नं० ५५४४ —— घ

भृङ्गराजकल्पः

पत्राणि ५८

संपूर्णम् (आयुर्वेदः)


158


नं० ५५४४-घ

# भृंगिराजकल्पः (आयुर्वेदः)

पत्राणि ५७ (संपूर्णः)

नं० ~~१०७८~~ ५५४४-घ









भृं·क
१

ॐश्रीगणेशायनमः ॐतत्सत् ॐश्रीगुरु
वरचरणरजोऽस्तिजयत् ॐनमःशिवाय ॐ
नमोविघ्नहर्त्रे अथभृंगिराजकल्पः ॐभृंगि
राजोनाममहौषधिः सर्वत्रैवजायते तेपुष्य
नक्षत्रेणसपत्रमूलमुत्पाटयेत् शोषयि
त्वाश्लक्ष्णंचूर्णंकारयितव्यं द्वितीयपुष्यनक्ष
त्रेणबिडालपदमात्रंगृहीत्वाकांजिकेनालो
ड्यपिबेत् नकिंचित्परिहरेद्बुधः एकमासोप
योगेनसर्वान्रोगान्व्यपोहति द्वितीयमासो
पयोगेनश्रुतिधरोभवति तृतीयमासोपयो
गेनश्रुतिधरोभवति दशमासोपयोगेनत्री
णिवर्षशतानिजीवति बलेनकुंजरंजयति
वेगेनतुरगसमोभवति गरुडोपमश्च अ
घक्षीरेणोपभुंजमानोमहानागबलोभवति
जीवतिवर्षशतानिपंच अथतक्रेणोपभुंज
मानो·· हरिणाषण्मासोपयोगेननाग
समोबलोभवति ·· ॐअमृतो
द्भवायामृतंमेकुरु २ नमो··
समाभिमंत्रितंनित्यमेवसमाचरेत् ··
भृंगिराजकल्पः अथसौदामिनीकल्पः

यस्यमहादेवयेननिःसंशयो
सर्वज्ञपरमे
श्वर ईश्वरउवाच शृणुशक्रप्रवक्ष्यामिक
ल्पसौदामिनीशुभं हिमवंतेपारियात्रेस
ह्येगिरिवरेशुभे जायतेसर्वदेशेषुवनेषू
पवनेषुच तस्याःप्रयोगंवक्ष्यामिशृणुशक्र
समाहितः सौदामिनीरसंग्राह्यसंचूर्तेनालो
ड्यपिवेत् तत्क्षणात्सर्वरोगाणांनाशये
न्नात्रसंशयः समूलपत्रशाखोपेतांसौदाम
नीचग्राहयेत् वारिणासहसंपीष्यमाहि
केनचभावयेत् गण्डरोगेषुदातव्यंगंडस्फो
टनिहृतये दत्वास्यचपत्रेचसौदामनिसमा
श्रितं कायाशुष्कंततःकृत्वाचौदेणसहभा
वयेत् अनामिकायालेपोयंविडालपदमा
त्रकं अनामिकाप्रणाशेपतहस्तमिंद्राशानिर्य
था सौदामन्यासूतस्तुल्यायस्यलेपःप्रदीयते
गंडरोगेषुसर्वेषुपिटिकानांविशेषतः नश्य
तेनात्रसन्देहः तूलराशिमिवानलः समूल
पत्रशाखोपेतांसौदामनीचग्राहयेत् माक्षि
केनसमायुक्तांपिटिकेषुचदापयेत् नश्यते

भं॰कं॰
२

नात्रसन्देहः तूलराशिमिवानलः सम्मूलप
त्रशाखोच्चां सौदामनीं च ग्राहयेत् मात्रिके
नसमायुक्तां पिटिकेषु च दापयेत् नवपतेना
त्रसन्देहः शुक्लवृत्तश्चाग्निना दन्तारस्य च पत्र
कसौदामनिसमायुतं पिटिकेषु च दातव्यं
दद्रूणां नाशनं परं शाशिलंकाम्रकालीच
रोया सौदामनी नटी नीला हनूमता चैव स
मज्जाता हिमालये लेपमात्राद्रोलकुष्ठमील
यित्वा प्रयोजयेत् सर्वव्याधिविनिर्मुक्तो भव
ति नात्र संशयः अष्टादशविधं कुष्ठं हत्वा मि
ह्राशानिर्यथा सौदामनी कुमारी च पेषयेच्छी
तेन वारिणा दुष्टरोगेषु दातव्यं तत्क्षणं ना
शयेद्ध्रुवं शालोडिकां सफलां च पेशयेद्वारि
णा सह सौदामनी समायुक्तां चूर्णमात्रिकसं
युतां गात्रस्फोटेषु दातव्यं गात्रस्फोटनिहन्त
ये दन्तारस्य च पत्राणि अजातीरेण पेशयेत्
नाशयेद्दुष्टरोगानि नात्र कार्या विचारणा सौ
दामनी महानीला विषहारेण संयुता यस्य
व तिलकं कुर्यात् दपस्मारात्प्रमुच्यते कांमा
मातिनिजं बीजं दन्तारस्य च पत्रकं सौदाम

2

निसमायुक्तंलेपंगंडविनाशनं हृन्नमत्यार
संचैवसौदामनिसमायुतं दद्रुपिटिकं
कुष्ठंलेपमात्रेणनाशयेत् कुंकुमंहरितालं
चसौदामनीरसंतथा शुनोमूत्रेणसंयुक्तंति
लकंयस्यकारयेत् बालग्रहोरतिग्रहोनश्य
तेनात्रसंशयः सौदामनीरसंयासंशवाम्बु
सहितेनतथा बाह्यग्रहेषुदानकंबालग्रहवि
वारणं सौदनीचनीलाचकांचन्याचसमायु
तं सर्वरोगहरंश्रेष्ठंकुष्ठरोगनिवारणम्
बलामोटाचरक्ताचसौदामनीसमायुता क
रीलसत्रसंयुक्तंनासिकानाशनंपरम् एक
वीरबलामोटासौदामनीसमायुता सौद्रेण
घृतसंयुक्तासम्यक्लेपंप्रदापयेत् गंडरोगा
निसर्वाणिपिटिकानिविशेषतः सौदामनी
मूलचूर्णंबिडालपदमात्रकम् गुडिकांभ
क्षयेन्नित्यंमाक्षिकेनघृतेनच कासश्वासह
रंघोरंकुष्ठशिथिश्चिनिवारणम् सौदामनीरसं
यासेनक्रमेणसहपेशयेत् गुटिकांभक्षये
न्नित्यंबिडालपदमात्रकान् घृतमाक्षिकसं
युक्तंमाहिष्येनवनीतके नित्यमेवनवघृणा

संभक्षयेत्मलपंचकं वलीपलितनिर्मुक्तो
सो॰क दिव्यदृष्टिप्रजायते जीवेद्वर्षसहस्राणि व
३ ह्न्यापिनसंशयः इतिसौदामनीकल्पः ॥
3 अथशतावरीकल्पः नाभ्यङ्कुतभयंतस्यत्रैलो
क्यंसचराचरं तंप्रणम्यजगन्नाथंवक्ष्याम्यौष
पसंग्रहं त्रैलोक्याक्रमणोर्ध्वेविष्णोरमितते
जसः स्वेदविंदुर्निपतितः पृथिव्यांवड्याग
तः तस्मान्महौषधीजातासर्वव्याधिविनाशि
नी वरस्त्रीरतिकामेनप्रयुक्तावाजिकरणेचसा
तस्यावरशतंदत्तंततःप्रोक्ताशतावरी शता
वरींसमुद्धृत्यसूक्ष्मचूर्णेनभावयेत् विडाल
पदमात्रंतुइष्टकामोनरःक्षिपेत् अथदिव्यौ
षधेनैषाप्रयुक्तामधुसर्पिषा नतत्रपरिहा
रोस्तिकामंकुर्याद्यथेप्सितम् अशीतिवातजा
न्रोगान्श्लेष्मजांश्चैवविंशतीम् चत्वारिंशत्पि
त्तजांश्चरोगान्हन्याच्छतावरी कासंश्वासमती
सारंहिक्कांगमलसंचयं अर्शांसिचतथाकंडूः
कामलांचविनाशिनी पाण्डामयंनाभिशू
लंमंत्रहृडिंहरेत्तथा मूत्रकृच्छ्रंचविद्रलेभं
सप्तचैवमहारोगान् अतिरजस्तथाचैववि

स्फोटान्नाशयेत्तथा सर्वाण्येतानि नश्यन्ति त
मः सूर्योदये यथा शतावरीप्रयोगेन व्याधि
कस्तु न शाम्यति न तच्छस्त्रं न तच्छेदं नैव चौष
धं तेऽपि ग्रहणं संप्रवक्ष्यामि यथा जानंति
साधकाः पूर्वदिनोपवासेन पुष्ये ग्राह्यमह्नो
षधीः मुद्गं मांसं तथा शालिः तिलमिश्रं ससैंध
वः हिङ्गु ग्वाइकसमायुक्तः कृसरो हि निगद्य
ते कृसरया बलिस्तत्र विकिरेत्तिलतंडुलान्
भक्ष्यं भोज्यं तथा पानं पयसा मिश्रमेव च . व
श्रीयास्तिन स्त्रवेणाति ममेत्रमुदीरयेत् ॐ ह्रूं ह्रुं
मातृपते मातृपते माते तेजो व्यतिक्रमे ॐ ह्रीं
ह्रुं ठः ठः ठः वन्द्यमाले स्वाहा श्वेतवति
ह्लूं कल्याणि मम कार्यकरी भव मम
कार्यं त्वं तेन देवि पश्चात्स्वर्गं गमिष्यसि
येन त्वां खनते ब्रह्मा येनेन्द्रो येन तेऽसुरः खना
म्यहं च तेन त्वां ब्रह्मसूत्रेन वारिणा ॐ नमस्ते
ऽमृतसंभूते बलवीर्यं च वर्धते बलमायुश्च मे
देहि पापानं च विमोचय उत्पाटयित्वा देवेशि
प्रदद्याच्छीतवारिणा जीर्णपर्णान्समुत्तुत्य
नस्या मूलं च निस्त्वचं भग्नेच स्रवते स्त्रीणां पिष्टं

श·क· नरम्भसोपमं प्रयत्नेन ततोग्रासार्धकंव
४ कयाचया विल्वमात्रंततः पिंडंपिवेद्धीतीर
संयुते जीर्णेनभोजनं तस्यपयसाषाष्टिकोद
५ नम् द्वादशाहेवसंप्राप्तेमृगेणवद्वामिलक्षणो
भवेच्छ्रुतिधरोवाग्मीबलवीर्यसमन्वितः ब
लेनकुंजरप्रख्योवेगेनपवनोपमः मयूरवद्ग
वेदृष्टिर्वराहवच्छ्रुतिस्तथा अलक्ष्यश्चभवे
त्वीसुवर्णनागरुद्रोपमः भवेन्मासप्रयोगेन
सर्वव्याधिविवर्जितः मासद्वयप्रयोगेनसद
प्रयोयत्नमात्नमः मासद्वयप्रयोगेनसर्वैःस
समतां व्रजेत् पुराभूमौनिर्मितायांवराहेण
प्रयोजिता शार्ङ्गवरशनैतेनतस्मादपिशता
वरी नारायणललाटाश्चपतिताःस्वेदविन्द
वः ब्रह्मणाविष्णुरुद्राभ्यांविन्द्रेणचयमेन
च आदित्येनचचन्द्रेणत्वमृतालालितायथा
यैतेलस्यावरोदनःसंसारेत्ववतारिता गच्छ
भद्रेनयादेविमत्र्याव्याधिपीडिताः ज्ञात्वा
सर्वलोकानांनान्यस्त्रातासरेश्वरि यःपिवेन्मा
नवःसोपिभक्तिभावसमन्वितः तेषांशरीर
जाव्याधिर्नभवेत्तुकदाचन ततःशतावरी

चूर्णं कर्षमात्रं समुद्धरेत् पिबेत्क्षीरहुताभ्यां
रजीर्णांते सर्वशुभ्रं भवेत् चतुर्थे मासि संप्रा
प्ते मेधावी स्त्रीषु चात्मयः बलदर्पजयोपेतो
नरः सर्वेषु निर्भयः अशीत्यां रेतो भवति शतं
स्त्रीणां च गच्छति लिंगं तु वर्धयेत्तस्य तुरग
स्य समं यथा वलीपलितनिर्मुक्तो जीवेच्च
त्रिगुणं शतं नवनागशतः प्राणः पद्मगर्भ
समद्युतिः योजनानां शतं गत्वा पुनरेवावि
वर्धते याः पिबंति स्त्रियश्चैव यौवनस्याश्रम
प्रमाः स्तनाभवंति ते तासां पीनोन्नतपयोध
राः शरीरं कनकप्रख्यं सुवर्णमिंडसमप्रभम्
बाहू मृणालसदृशौ ब्रह्मगजकरोपमो गर्भे
पद्मसमप्रख्यं नीरोमे परिवर्तलं पीनं गज
समप्रख्यं शरदिन्दुसमप्रभं सौभाग्यमतुलं
तासां याः पिबंति शतावरी पुत्रं जनयते तासां
सर्वराज्यकरं प्रभुम् पशोस्तासां महाव्याधिः
शरीरं पीडयेत्सदा नश्यंति व्याधयस्तेषां सिं
हस्येव यथा गजः न पिशाचा न यक्षाश्च न भू
तानि च डाकिनी गदाद्यो विषं चैव कुरुका
व्याधयस्तथा सर्वे पलायंते यो ति गरुडस्य

श॰क वपन्नगाः नश्यंति व्याधयस्तेषां यथाग्निना
५ तृणादयः शर्वरीमद्भुर्ग्रहीना स्वस्वभावरहिता
नराः पापभाजो मनुष्याश्च नापिबेति शताव
5 रीम् किमन्यदौषधं तस्य किमन्यत्तस्य संग्रहं
तस्मात्सर्वप्रयत्नेन शरीरे व्याधिते सति शता
वरीं पिबेन्नावत्सर्वव्याधिविनाशिनी सर्वव्या
धिविनिर्मुक्तो रसायनविधियोपमः ॥ इति शता
वरीकल्पः ॥ अथहारिलिकाकल्पः ॐ नमः
स्कन्दाय हरितामृतकराय स्वाहा अनेन मंत्रे
ण जप्ता हृष्टेन महौषधी उलूखले कुट्टयि
त्वा वस्त्रेण निष्पीड्यते ततः क्षीरेण मधुना स
र्पिषा तैः सार्धं च तन्मर्दयेत् ततो भूमौ निपत
ति क्षिमुहूर्तं प्रस्वमवत् प्रबुद्धेन ततो तिष्ठे
न्महाबलपराक्रमः मन्त्रजापी भवेन्नित्यं
देववद्विचरेन्मह्यां द्वेसहस्रे च वर्षाणां जी
वेत्षोडशवर्षवत् तस्यामूलं च संगृह्य पारदे
न समन्वितं लेपं दद्यात्स्वशुल्वस्य कांचनं भ
वते सहस्रकृत् तस्मात् कंकाकजंघास्वकरे म
र्दयेत्ततः भस्मीभूतं भवेद्यावत्स्तनकां क्रिय
ते सहस्रकृत तेन संलिप्तदेहो यो वज्रवद्भवते द

धम् शास्त्रेणापिनसंछिद्यतेऽग्निनादह्यते
तथा सिंहसूकरव्याघ्राश्च जम्बुकाः शरभाः
खगाः अभिद्रवंतितत्रैवपलायंतिदिशोदश
वैगतिःजायतेतस्मान्नात्रकार्याविचारणा
नदेयादुष्टबुद्धीनांचारणानांविशेषतः गु
रुभक्त्यायदातव्यातदासिद्ध्येन्महौषधी शत
दिलिकाकल्पः ॥ अथमहागोनासीकल्पः
गोनासीगोनसाकारामंडलैर्गोनसप्रभैः प
र्णव्यामात्रनादिव्यादितैस्सूचीतिसंज्ञिता
ताम्बूलीसदृशाःपत्रैःपलाशैर्भीमदर्शनैः
लम्बितापर्वतस्याग्रेसत्यमाहुस्तेजनैः रसे
नसमनात्तस्यासातुमत्सुज्वरापहा तांप्रनष्ट
चनेकालेहंसमारसनादिते उपयुंजन्वसंते
वैशाखेतुचताविवर्जिते प्राजापत्यंबलिंदत्वा
ब्राह्मणान्स्वास्तिवाचयेत् त्रिपर्वामहतीश्या
माचतस्त्रश्चात्रमध्यमा कनीयसीततासांवै
पंचपर्वापिजायते क्षीरेणपेशयेत्सर्वांक्का
थयेच्चमदाग्निना चतुर्भागावशेषंचआवि
कारःपिबेन्नरः जीर्णस्यतुभवेद्रूपंनिर्हंति
वलितंविषं सोऽभूतेनततोविद्याच्चदितेरवि

गो·क
८
6

मंडले भ्रमलेनैवविधिनाचोपयुंजेद्रसायनं
प्रथमेपातकान्हंतिद्वितीयेचोपपातकान्
तृतीयेह्निसंप्राप्तेदोषान्मातृकपैतृकान्
चतुर्थेब्रह्महत्यांचसर्वाश्चैवोपपातकान्
पंचमेह्निसंप्राप्तेशांतात्मासचतुर्बुद्धिमान्
स्वशरीरीतुषष्ठेस्याद्दिव्यचक्षुस्सप्तमे सर्वं
चतन्निगदितेत्वष्टमेह्निमानवः नवमेतच्च
विंदिव्यांवपुश्चांतेचयौवनं दशमेकादशेचे
वदिनेत्रैकाल्यदर्शनी द्वादशेचतत्रेदिव्यांव
पुष्मान्यौवनाधिकः त्रयोदशीचसंप्राप्तेदि
वाकरसमप्रभः चतुर्दशीपंचदशीसर्वौषधीः
सपशुपति मूर्तिमंतंमहादेवंसपश्येत्षोडशे
दिने ऋग्वेदंतुपठेन्नित्यंयजुर्वेदंपरेदिने दि
नेतष्टादशेचैवसामवेदंपठेदसौ अतऊर्ध्वं
तुभगवानुपयुंजेद्बृहस्पतिं सांगोपांगानिवे
दानांसर्वमस्योपतिष्ठति अतऊर्ध्वंपरीहाराः
षट्गुणाःपयसःस्मृताः दशवर्षसहस्राणि
जीवतिध्यानिरामयः नशस्त्रविषदंष्ट्रेभ्यस्त
स्यगात्रेभयंभवेत् पिवेद्दिनानिवासमत्रिफ
लारससंयुतम् सर्पिःक्षौद्रसमायुक्तंसर्पिषु

क्रमथापरे दिनानिविंशतिचैवंनरःपिवेत्स
मंततः जीर्णान्नेभोज्यजीर्णेचजीवेद्वर्षशतं
नरः एषकल्पःपुराप्रोक्तोब्रह्मणाचहितैषि
णा त्रिफलानांकर्षत्रयंपिवेदष्टदिनानित
सर्पिःसमांशंत्रिफलारसेनभुक्त्वान्नपानेनय
थासुखेन ह्रस्वेश्वकेशैःकठिनैश्चदंतैःमासा
नथान्योभवलोचनस्य इतिमहागोनसीक
ल्पः ॥ अथनमेरुकल्पः हिमवद्भिखरेरम्ये
नानाधातुविचित्रिते सर्वौषधिसमाकीर्णेना
नापक्षिनिनादिते तत्रासीनंविरूपाक्षंक्रीडंतं
सहगौर्यया तयासाक्षादिमंदृष्ट्वाविरापुर्जी
र्णविग्रहं त्वचास्थिस्नायुकेशंचजर्जरीतं
चिरायुषं देवीसंजातकरुणापृच्छंतीपरमे
श्वरं ईश्वरउवाच शृणुदेविप्रवक्ष्यामिसर्व
लोकहितैषिणि क्षीरोदमथनात्पूर्वंमंदरोद्धर
णविग्रहः विष्णुतोयतरोश्मा मेतत्रजातामहौ
षधीः नमेरुरितिविख्यातातस्याःकल्पंवदा
म्यहं तेनमंत्रप्रयोगाश्चशृणुध्यायतलोचने
विंध्येचपारियात्रेचसह्येगिरिवरेतथा श्रीने
श्वरपर्वतेपुण्येनत्रचोनरमानसे शाखवपन

षेजातोनुहिनाचलश्शतः पतन्तेत्रवरंचास्यां
कश्मीरायांचसर्वतः तेत्रंगत्वासितेपक्षेद्वाद
शीसत्रयोदशी विस्तेत्रग्रहेचैवरोद्देवाग्र
हसंयुते फलंविद्रुमसंकाशंवधराएउंप्रमा
णतः वीतसीपत्रसदृशैःपत्रैःसद्दयतिर्मलैः
छत्राकारंमहावीरंसगन्धंतेत्रभासकं ग्रहो
रात्रोषितोभूत्वाकृत्वाशौचस्तसाधकः शुक्ला
म्बरधरोवीरःतेत्रेयातिक्रियाक्रमे सिद्धार्थ
तिलमिश्रंचवैधीस्त्रकसंयुतं चतुर्दिक्षुवि
दिक्ष्वन्यांशितैर्वकुाशिलीमुखैः पंचरंगिकसू
त्रेंतसाधकोपरिवन्धयेत् नैवेद्यंकारयेन्मित्रं
सावित्रेणाभिमंत्रितम् अस्यौषधस्यज्ञानं
चोपयोज्यंविधानतः छायाशुष्कंचकर्तव्यं
पंचांगंचसुचूर्णितं ततःकामलाव्याधौतुवि
डालपदमात्रकं क्षीरेणसहपातव्यंषएमासं
षडहंतथा कामलापुत्रपांडुत्वंसमूलंदहते
नृणां एतच्चूर्णमधुयुतंसर्पिषासहभक्षयेत्
भोजनंचततःपश्चात्कारयेत्सकृषकस्तथा न
क्रांध्यंपटलंकाचंतिमिरंरक्तराजिकां अर्बु
धंतथ्यवाशेगुदनासादिषचर्मसां कण्डूःश्वि

ष्वकुष्ठंचदद्रूपामाविचर्चिका हंतिव्या
धिबलंसर्वंवृत्तमिंद्राशनिर्यथा नमेरोध्र
पलान्यष्टौपंचगव्येनचूर्णितं माहिषंनव
नीतंचतत्समंयोजयेद्बुधः स्थाप्येमृण्मे
येभांडेधान्यराशौनिधापयेत् एकविंशति
रात्रेणतमुद्धृत्यप्रयत्नातसह धात्रीफलंहरी
तकाएकीकृत्यनिशाशिनः पलमात्रप्र
माणंचषण्मासोविजितेंद्रियः वलीपलि
तनिर्मुक्तोदृढकायोमहामतिः दिव्यदृष्टि
श्रुतिपरःतरुणादित्यवर्चसः जीवेद्वर्षस
हस्राणिचत्वारिविगतज्वरः अथान्यंसंप्रव
क्ष्यामियोगंमृत्युविनाशनं बलामोटानमे
हंचशतावरीहरीतकी धात्रीफलंचबृहती
लोहचूर्णगुडूचिका सर्पिःक्षीरंतथातैलं
सर्वैतेसमभागिनः कृत्वास्वासितांतचू
र्णसारदारुरसस्यच कृत्वापलशतेपीमा
मूर्णमध्येविनिक्षिपेत् ताम्रभांडेचसंस्था
प्याग्निःसप्तदिवसानिच त्रिसप्ताहेततःचू
र्णचोद्धृत्यचविचक्षणः गुलिकांकारयेत्स
म्यकाक्षमात्रप्रमाणतः सितशर्करयासा

र·क·
८

8

ंभक्षयेतसक्रान्तकृत् भोजनस्यादिसर्वं
तत्क्षीरान्नंभोजयेत्ततः शाकमूलफलंवर्ज्यंश्रा
म्यपर्मितथाधनि संवत्सरोपयुंजानो आधि
शोकजरावलीः विनाशमुपगच्छंतिनरुणां
कोपुतद्युतिः नवनागबलंतत्स्यंचवक्षवागरु
डोपमः सहृडस्मारितंयास्येलोकानामग्र
तंस्पधीः निधानानिचपश्यंतिश्रीमुखोनित
थैवच रसंरसायनंचैवपश्यंत्योषधयोगतः
इतिकिंचिन्नमेरुकल्पः ॥ अथरोहकल्पः
अथातःसंप्रवक्ष्यामिपुनरेवरसायनम् क्षी
रोदौमथ्यमानेतदेवानामसुरैःसह विपन्नो
चामृतादेवाःपतितःपंचविंदवः दैवेशस्य
पश्यंयत्रहिमवत्कुक्षिमाश्रितं तदामृतमयो
द्वौचहिमवत्सानिनोदरो द्वौरसौतत्रवेजातौ
च्छिन्नरोहौमहाबलौ तयोःपीतेसहातोये
नमृत्युर्जायतेनृणां च्छिन्नेपीतेभवेच्छेदः
सर्वगात्रेषुसर्वदा रोहेरोहंब्रजेत्साशुसुदृढं
यातिकलेवरं ॥ शुक्रउवाच देशंवक्ष्ववनं
नामस्वयंभूर्यत्रशंकरः छगलांडइतिख्याता
स्वयंदेवोमहेश्वरः कोशद्वयमतिक्रम्याच्छि

नरोहो महाबलौ तत्रगत्वा महाभागः पि
वेच्छिन्नेदिनादश विंशतिश्च भवेद्धोमात्रस
श्वाप्यमृतोपमः पीतमात्रस्यच्छिद्यंते कुक
र्माणि विशेषतः इतिच्छिन्नरोहकल्पः ॥
अथकांतामालिनीकल्पः शुक्रउवाच पुरा
देवासुरेयुद्धे संग्रामेलोमहर्षणे काम्भको
नामदैतेंद्रः कांतारूपेणचागतः सर्पंचतत्र
विश्रांतो विष्णुर्नारायणोऽस्थितः सुमेरौपर्वता
ग्रेतत्रासौदैत्यआगतः कंठेजयाहचक्रले
पाणौयतमानसः त्राणघासेनकुसेनच्छ
हृषारीनिपातितः कर्णौकनकसंकाशौदग्धः
कुसेनमायया कांतामालिनीनामेनसुखं
समभवत्तदा सौगन्ध्यंतुभवेत्तस्य कांतानांत
सदाप्रियम् विस्वदगपमतः तस्माद्धिसुरूपे
णचोत्थितं पूजितंचापिदेवैश्चमानवैश्चवि
शेषतः अकदन्तभवेद्भूयोवीजमसूरिकासम
महदुन्मादनकरंचान्तर्थिकविनाशनं अपस्मा
रगृहीतस्यगुल्मकेश्वष्टधाग्रहैः कांतामालि
नीवीजंतुसारसंवचयासह सक्तुहितंकृतं
ह्वर्णगंडमालांतल्लेपयेत् निवर्ततिमहाव्या

का॰क॰
८

9

धिरत्र नास्ति विचारणा पेंडिपत्रं सरसंग्रगृ
लं चनमेरुकं कांतमालिनी बीजं च समभा
गानि कारयेत् एकत्र चूर्णयेत्तानि सखोसे
न च वारिणा लेपेनानेन सततं स्पर्शरोगी स
खी भवेत् देवदरु संग्राव बलातक समा
युतं वलामोदी कुमारी च वीजमस्य ल थेव
च एकत्र क्वाथयेन्नित्यं रसवेदी भवेत्सदा
श्रायसं वा कुशोगुकं वेदयित्वा रसेन व शु
लं भवति नात्यर्थं नात्र कार्या विचारणा कां
तामालिनी प्रप्याणि दत्तरस्य च वीजकं मथि
त्वा च पलं दद्याच्छागलेन च तेन च अपस्मारगृ
हीतस्तद्दिप्रमेतेन मुच्यते कांतामालिनिमू
लं च यस्य समाभिमंत्रितं दीयते सर्पदष्टस्य
त्वदग्धो भवते नरः ॐ नम उन्मत्तभैरवाय म
हाश्मशानवासाय योगिनीसीविताय महा
मादेहमाय भैरवरूपिणे महाभूतकल्लोल
कलमलाय स्नानन पट्टाहिनद्देव त्रिलोचन
त्रैलोक्याधिपतये उन्मादमुर्दयाहिरिमिरियो
गिनी चर्माप्रियाय नररुधिरवसाभूपितदेहा
य गाडप्रच्छाहिगम्याय नारीमरवान्दिनावि

मोहयपन्नगभक्षायगरुडरूपधरायनमस्ते
ॐह्रिर्लक्लींश्रींसरसक्रासस्वार्णायस्वाहा ॥
मन्त्रेणानेनवैजप्ताकांतामालिनिगुच्छकम्
दद्याद्दानरहस्तेनतत्पसस्ताभिमंत्रितम् स्व
स्याविशेभवेद्देवंचेटकावेशनंतथा करोति
सर्वकर्माणिमन्त्रौषध्याबलेनच गोमूत्रवि
ड्यत्पस्तनेचटकोव्रजतेक्षणात् एतद्रहस्यंप
रमंनदेयंयस्यकस्यचित् दानंशिवभक्ताय
त्वन्यथापापभाग्भवेत् इतिकांतामालिनीक
ल्पः ॥ अथसुवर्णक्षीरीकल्पः ॐषथीहिमक्षीरी
चसैवप्रोक्ताहिमावती शासतीसर्वरोगाणांत
स्याःकल्पंप्रचक्षते शुष्कचूर्णंततोकृत्वादापये
च्छ्विित्रिणांप्रिये कटुतैलादिसंयुक्तांमर्दयेच्छ्वि
त्रिकोपरि ततोविनश्यतीश्वित्रीतत्क्षणान्नैव
वसर्वशः तदेवमूलमाकृत्यचूर्णयेच्चसमंत
तः कांजिकेनसमायुक्तांश्वित्रीणांपरमौषधं
तस्याःसमूलपत्रायाऔषध्याश्चूर्णमाहरेत्
गन्धपाषाणसंयुक्तांधातकीपुष्पसंयुतं मन
शिलायाभागेचपत्रं लवणानिच हेरुरि
द्रेचमंजिष्टादद्यादेवशनावरी समभागा

सु·क· निसर्वाणिसकलचूर्णानिकारयेत् कटुतैलाभ्यु
१ क्तमात्रंपश्चाच्चूर्णंप्रदापयेत् आतपेमर्दयित्वा
तुकुष्ठान्सर्वान्व्यपोहति भगन्दरंमहाव्याधिःहि
प्रमेतेननश्यति सुवर्णक्षीरीहिमन्तेपिष्ट्वाचो
10 ष्णाम्बुनापिबेत् त्रिवृत्ताशर्करातुल्याग्रीष्मका
लेविरेचयेत् हस्तुषांमातुलांश्यामांद्रवंतीकटु
रोहिणीं सुवर्णक्षीरीसंचूर्ण्यगोमूत्रेभावयेत्त्र्यहं
एषसवल्लकोयोगःस्निग्धानांमलदोषकृत् ॥
इतिसुवर्णक्षीरीकल्पः अथापामार्गकल्पः अपा
मार्गामहादेवीऔषधीभुविविश्रुता शतामिषा
त्विनत्वेउत्तरेत्याविमदिग्गता कुष्ठेनतुसमायो
ज्यातगरेणविशेषतः विषंचनाशयेत्सर्वंप्रले
पेनचसर्वशः हरिद्राकुष्ठसंयुक्तासर्वरोगान्नि
वारयेत् तंडुलोदकसंयुक्तंतगरेणसमायुतं
सर्वाल्लूताःस्फोटकाश्चगर्दभाश्चविशेषतः स
र्वान्विनाशयेत्क्षिप्रंनात्रकार्याविचारणा हरीत
कासमायुक्ताचोदरशूलनाशिनी पथ्याहिंगुस
मायुक्ताकुक्षिरोगान्विनाशयेत् वचयाचैवस
हयावष्टंभंनाशयेत्क्षणात् हरितालसमायु
क्ताश्मानंनाशयतेसदा इत्यपामार्गकल्पः ॥

अथमधुयष्टीकल्पः मधुयष्टीचतास्त्राचनी
लोत्पलविमिश्रितं प्रपुंडरीकसंयुक्तंमंजिष्ठा
समभागिकं गव्येनाज्येनचालोड्यप्रलेपाद्या
तच्छूलजित् अत्रदूतेषुसर्वेषुलेपनंपरमौषधं
शिरःशूलेभवेद्यस्यपिंडीचपरमाहिता मधु
यष्टिपलमात्रंतुक्षोदकेनपीतं पच्छूलंविषू
चिकांनाशयति इतिमधुयष्टीकल्पः ॥ अथ
सोमराजीकल्पः हिमवाद्भिरवैरम्येमासेचा
स्वयुजेशुभे बीजंतदिंदुलेखायाःपरिभागेन
शोभने उत्पद्यतेचसर्वत्रपश्चिमेद्वीपदेपदे
प्रणमामिस्वरूपाणिनस्यापत्राणिभार्गव
पुरासोमस्यरुक्मिण्याशापासमक्षस्यकाङ्क्षितः
त्वष्टेनभावनास्पृष्टादेवीचान्द्रमसीततः सो
मराजीसमाख्यातात्रैलोक्यरोगनाशिनी अ
ष्टादशानांकुष्ठानांदद्रूणांपामनातथा विच
र्चिकाकिलासानांकंडूविस्फोटकार्शसां पांडु
श्वयथुवीसर्पस्वरसोडुम्बरादिना विंशतिःक्र
मिकीटानांलूतापीपलयादिनाम् मुखगंडा
दिरोगाणांनेमिर्यपटलात्मनां काचातिपैत्य
संकोचवर्त्मभल्लयमादिनां मतस्यासंरविदे

क॰ ११

वमेनेषामौषधंहितम् कथयामियथातथ्यं
साधनंश्रृणुभार्गव सोमराजीतथानित्यंमा
सीचकटुरोहिणी मात्रिकेनसमालोड्यसर्वभा
गानिसर्वदा हंतिदद्रूरुजादाहविस्फोटाश्चित्रि
कामलां अपस्मारादिरोगांश्चसेव्यमानोदिने
दिने वित्तषंवाकुचीवीजमारनालेनलेपयेत्
पलैश्चतुर्निसंख्येनभांडमेकंतुलिम्पयेत् गोक्षी
रेनपरिस्राव्यतस्मिन्भांडेपरिक्षिपेत् एकविंश
द्दिनंस्थाप्यंततोमथ्यंचमथ्ययेत् तेननक्रेणमा
सार्धन्नश्येत्सर्वामयान्वहून् सप्तकोष्ठान्किला
सांश्चदद्रूकंडूविचर्चिकां विंशतिःक्रिमिरोगां
अपामाचैवतथार्चसां अस्यामासोपयोगेन
कुर्याच्चांद्रमसंवपुः गुडसर्पिःसमायुक्तंसोम
राज्याश्चकार्षिकं गोमूत्रमनुपानेनतस्यादया
द्विचक्षणः भुंजीतपयसातुष्टंषाष्टिकंसहस
र्पिषा अकालपलितंहन्यादेषयोगोनसंशयः
नाशयेत्सर्वकुष्ठानिवलीपलितनाशनः ति
मिराणिचसर्वाणिपांडुरोगंतदैवयम् योगमे
वप्रयुंजीतब्रह्मचारीजितेंद्रियः सप्तरात्रेण
मेधावीउपयुंजीतसर्वदा तृतीयस्यचयोगस्य

प्रयोगमपरंस्मृतम् धात्रीरससमायुक्तंयेनकु
ष्ठाभिचूर्णितम् सम्यक्प्रशमयत्येवंदशरात्र
प्रयोगतः चतुर्थयोगमाख्यातंआज्ञानकरसे
नच आलोड्योद्वर्तनंकुर्यात्सर्वकुष्ठनिवारणं
पंचमंयोगमाख्यातंतस्यचूर्णंतुपेशयेत् न
स्यमेतत्प्रयुंजीतजलेनालोड्यपाययेत् इति
सोमराजीकल्पः ॥ अथमूत्रकल्पः गावःस्थि
ताजगत्सृष्ट्याईश्वरेणविनिर्मिताः तासांश्रेष्ठम
हापोतोयत्रस्यश्चसरित्पतिः योनिद्वारेवसेद्गं
गाचोर्ध्वस्यंसोममंडलम् तेनमार्गप्रवाहेण
सुतंतन्मूत्रमुत्तमम् यःपीतपलमात्रंतुवर्षमे
कंचपावति दद्रूक्षिनालिपामांचनेत्रयोर्हंति
जालकं द्वौपलौपीतमात्रौचपांडुरोगनिकृं
तनं त्रीश्चपीतायदाकेनवातस्ययष्टुनाशनः
चत्वारिचयदापीताःतिमिरंलघुशाम्यति
पंचपीताहरत्याशुकुष्ठमष्टादशंपरम् षट्
पीतापावतिश्वेत्रंहंतिडष्टंचतुर्विधम् सप्ता
नांपीतमात्राणांयोगीभवतिनिर्मलः आम
लरससंयुक्तंवातशोणितनाशनं भृंगिरा
जसमायुक्तंवल्मीकानांचनाशनं सोमराजी

क॰ १२

12

समायुक्तं दुष्टव्रणमलापहं निम्बचूर्णसमा
युक्तं गण्डमालाविनाशनं वचाचूर्णसमायुक्तं
वातशूलविनाशनं इत्येतत्कथितं देवि गोमू
त्रकल्पमुत्तमं यच्छ्रेष्ठं मध्यमं भागं संस्रवत्या
च पार्वति प्रथमं जलवद्भागं पश्चिमं निर्गुणं
स्मृतम् मध्यमं क्षीरवन्नित्यं तस्मान्मध्यमाहरे
त् इति गोमूत्रकल्पः ॥ अथ त्रिफलाकल्पः
त्रिफला श्लेष्मपित्तघ्नी मेहकुष्ठविनाशिनी
आयुष्या चैव बल्या च वलीपलितनाशिनी
नाशयेद्राजयक्ष्मा च अर्शोगुल्मविनाशिनी
क्रिमिकण्डूप्रशमनी नाडीव्रणविशोधनी दृ
ष्टिप्रसादजननी मेधास्मृतिविवर्धिनी घृता
न्विता वा मधुनान्विता वा गुडान्विता तैलसम
न्विता वा एवानिहृत्यामयुञ्जैः प्रयोज्या सर्वाम
यानां शमनी हितार्थं वातरोगेषु तैलेन पित्त
रोगेषु सर्पिषा कफरोगेषु मधुना प्रयोज्या त्रि
फलान्वैः योज्यास्तिस्रो हरीतक्या तथा षट् च
विभीतिका द्वादशामलकादीनि त्रिफलेयं
प्रशस्यते क्वाथयेत्त्रिफलां पीत्वा नाशयेत्ति
मिरामलं नेत्राम्बर्याम्बुदोहंति रागकंडूं च ना

शानं भावान्मध्या तथा चूर्णं कृत्वार्धपलकां
शिकां पिबेत्कोष्णविमूत्रार्धपलिकाम्भयथाव
लं त्रिफला सर्वरोगघ्नी त्रिभागघृतमिश्रिता
विसर्पिव्रणं कुष्ठं हन्ति चार्धावभेदकम् म
धुना त्रिफलाचूर्णं प्रयुक्तं नाशयेद्ध्रुवं प्रमेहं मू
त्ररोगं च गलगंडापचीं तथा भक्षयेत्त्रिफलाक
र्षमांसं च भक्षयेत्समान् वर्धते ये समाद्दष्टिमाति
हरमवाप्नुयात् प्रसन्नदृष्टिरव्याधिर्जीवेद्वर्ष
शतत्रयं नीलालिकुलसंकाशं केशराशिम
टेबलः मेधावी स्मृतिमान्धीरः स्निग्धश्यामवपु
र्यवा सुभगस्थातिरूपश्च स्त्रीणीतानन्दवर्धनः
प्रातर्हरीतकीं खादेत्मध्याह्ने हे बिभीतके रात्रौ
समस्त्रपुरुषः चत्वार्यामलकानि च यथेष्टे चे
ष्टः पुरुषः षण्मासाय प्रयोजयेत् व्याधयस्त
स्य नश्यंति सवलीपलितानि च रूपेणकामप्र
भया शशांकोद्दष्या गरुत्मानिव हंसदेशः बले
न नागः पवनोज्जवेन गीरिर्गुरुत्वेन भवेन्नरोसौ
त्रिफलाकल्ककर्षेण तैलमात्रं प्रलेपयेत् न
खोस्थितमहोरात्रं ततः प्रक्षाल्य वारिणा मधु
सर्पिषुतं लिप्त्वा न्मानवः प्रातरुत्थितः श्रीमा

क॰ सान्विधिनानेनजीवेद्वर्षशतत्रयं नचैनंप्रभवे
१२ त्स्त्वनालक्ष्मीर्नविषंनरुक् नचोपसर्पिकाके
चिद्रोगाशारीरमानसः त्रिफलामामतांकृत्वा
वारिणेतांफलांनिशि प्रातःप्रातःपिवेद्धीमान्वि
षमज्वरशांतये विडंगाचित्रयंमोषंसहस्राग्रुःचू
13 र्णसंयुतः तक्रेणपीडात्रिफलाजयेत्पांडुमयं प्र
वम् खदिरत्रिफलानिम्बपटोलैःक्वाथितंजलं
पिवेत्कुष्ठामयघ्नंरपित्तरथेविशेषतः त्रिवृद्दं
तीविशालाभिः सङ्कपीतंफलत्रयं हन्यादशेष
कुष्ठानिसोदावंतिमलान्क्रमीन् पथ्यामलानां
कुरुवांस्त्रकाल्यंविभीतकानांकुरुवेप्रमांच प्र
स्थंचधात्रीफलतोविपाच्यद्रोणेजलस्यार्थचतु
र्थशेषे प्रतिप्रषट्चत्रिफलादलानांपलानि
संचूर्णजलेनपिष्ट्वा प्रस्थंघृतस्याथपचेत्तव
स्यचात्तच्छमेनत्परमोपदिष्टम् श्लेष्मैर्मलंना
शयतिप्रसह्यदृष्टिंप्रसन्नांविदधातिसद्यः ह
न्यादशेषंतिमिरंतदाद्यागोदीर्हरुजंनाग ॥
कंडूः त्रिफलात्वचमायमस्यचूर्णंविनिहंतिच
॥ दंतोदरशूलं सपटोलसंमृककाचशोत्यं
सजयत्येषविशेषतःप्रियेदं नतकेवलमेव

लोचनानाविहितोरोगानिवर्हणायतंसा द
शनश्रवणोर्थकंरजानांप्रशमेदेतनयेतथाम
यानां अर्शोभगन्दरप्रमेहे
कुष्टानिहलेमकीम् पलितानिचनाशयेत्तथा
ग्निंचिररूहंचकरोतिसप्रचंडम् दयिताभुज
पंजरोपगूढेस्फुटचंद्राभगणांचयामिनीषु म
रतानिकुर्वन्निवचतेसोऽपिपलेयोगमत्ताानिसेव
ताहः त्रिफलादलचूर्णस्यकृत्वापलशतंसमं
भृंगीराजरसेनेवकुर्यात्रिःसप्तभावितम् लिहे
न्मधुघृताभ्यांचपलानिप्रत्यहंप्रमान् जीर्णेग
रुडसंचरणंतेषामवाप्नुयात् इतित्रिफला
कल्पः॥ अथामलीकल्पः आमलीयंशर्करया
भुंजीयात्प्रयत्नतः नरा
णांहितकाम्यया हरीतकीआमलकंगुडेनस
हमर्दयेत् विरेचनंमहाश्रेष्टंसिद्धेयंचरसाय
नः काचमचीरसंप्राप्तंआमलीयंरसंतथा म
धुनापाययेत्तत्रताम्रभांडेविनिक्षिपेत् मर्दये
त्प्रयत्नेनयावच्चूर्णंघनंभवेत् दद्तनेत्ररो
गेषुभवतिदिव्यचक्षुः अन्यंचानन्यतोक
र्यायस्यचान्योन्निपातितोः हेहरिदेहरीतका

क॰ कुष्ठं मांसीचसामलैः एतान्यंजनयोगेनचत्व
१४ शेईशणेतेस्ववम् तैमिर्यंकाचपटलंसमुक्र
कंडूपक्षवंनयनामयाश्च अन्येपिदोषानभ
वंतिजातुसर्वान्निहन्यान्नयनामयांश्च आम
लीयरसंग्राह्यंतथाभृंगिरसंसमं हरीतक्याः
मसंचूर्णंचेकीकृत्यतमर्दयेत् यत्किंचित्कपि
लंचैतल्लेपयेत्तद्दिवानिषट् भवंतिकृस्नरोमा
णिसप्तमेदिवसेगते यत्किंचिद्दास्तिजारोमा
भवंतिकृस्नकुंचिताः आमलीयरसंशृक्ष्णेतश
र्करभावितम् उष्णपानीयसंयुक्तंपिवेत्तद्दिवस
त्रयम् ततःहंतिनरपाहेदंदाहज्वरचिकित्सितं
आमलीयरसंशृक्ष्णमधुनार्द्दरसंतथा पिप्पली
पिप्पलीमूलंमरिचंमधुनामली एकत्रपेषयेे
यत्नाद्भोजनंचैवमाहरेत् सेव्यमानेचनश्यंति
व्याधयश्चैककष्टाश्चया चंदनंकुंकुमंमिश्रंआ
मलीरसभावितं प्रातरुत्थायतिलकंअलक्ष्मी
नाशयेत्सदा इत्यामलीकल्पः ॥ अथएरंडकल्पः
कल्पमेरंडतैलस्यप्रवक्ष्यामिमहागुणं रसाय
नंहिमर्त्यानांनराणाममृतंयथा अंगतेत्वच
स्त्वग्गीप्रविश्यकिलयोगतः प्रविष्टःचेत्त्वसं

गातः विच्छेदकिलसमया मकृतोपशपन्कल्कं
चवज्रंचकपिरोहितम् जलेप्रक्षालयामास
रक्ताःशुक्लाश्चवित्त्वः यत्रयत्रापतंजातापेरं
डस्ततत्रतत्र रक्तास्तथापरंशुक्लातेषांतैलंन
वीजतः पेरंडतैलंस्वाडसंभेदिवातकफापहं
त्रिकवंक्षणकटयूरुपृष्ठशूलकंसम्भूलजित् ना
न्यदेरंडतैलेनसदृशंतेजसंभवं अपन्नयादि
वेदेनदशमरीभूत्रकृच्छ्रयोः हिंगुवेतससंतोरे
ध्रुकंकल्मंतवादिके त्रिफलयाथसंयुक्तः उद
वंतविवन्धयोः मस्तामिधासेवीतेपित्तेद्राक्षा
रसान्वितान् यवकोलकुलत्थानांक्वाथेर्वासे
क्तिकःपिवेत् शुण्ठ्यामगन्ताशुक्लंकोलामल
कभेरसैः अर्दितेकलशूलेचयोनिदोषेभगंदरे
कासानपत्रकेसीहिप्रयाणेविषमज्वरे हृद्रो
गेवातिकेशूलेवपथ्योवातकुंडलैः रेतोदोष
वातरक्तेसर्वरोगेप्रशाम्यति अशीतिवातजा
न्रोगांश्चत्वारिंशच्चपैत्तिकान् विंशतिःश्लैष्मि
कांश्चैवतैलमेतद्व्यपोहति इतिएरंडकल्पः ॥
अथपुनराम्लीकल्पः ग्रीष्मकालेचसंप्राप्ते
वर्षाकालेतथैवच संभृताचोषधीतत्रगर्जमा

क· १५

15

नेनभस्मले हन्तेभ्यश्चैवपतितालतागुल्मेभ्य
एवच मूलेनरहिताचैव आम्लातेनकीर्तिता
तस्याःकल्पंप्रवक्ष्यामिविस्तरान्नवयत्नतः
शृणुवत्से समासेनसर्वदुःखनिवारणं आम्ल
लांचसमादायस्तस्त्वचूर्णंचकारयेत् घृ
तेनसहसंयुक्तोदद्यादंगेषुसर्वतः तत्क्षण
नाशमायातिगंडस्त्रापिटिकास्तथा गाडर
श्चोपरिवद्रश्चाच्छाःकर्पटेनतु ततोविना
शमायातिगंडावैनात्रसंशयः पुनरन्यंप्रव
क्ष्यामितिधानमिन्द्रयादृशं आम्लाकर्षमा
त्रंतत्तीरेणसहक्वाथयेत् पानेरजस्वलाया
स्त्रियोदद्याद्धिचक्षणः षंडत्वंजायतेतस्य
नात्रकार्याविचारणा २ आम्लंतसमादाय
आकरेयोजयेन्नरः कटिभंगेचास्थिभंगेलेपं
दद्यादसंशयं शूलंनश्यतिवैशीघ्रंसर्वस्य
ममतंभवेत् ३ अस्याश्चूर्णंसमादायघृतेन
सहयोजयेत् ४ अपीतासत्यःप्रभुच्येतवि
षमज्वरतस्तथा ४ अस्याश्चूर्णंसमादायग
व्यक्षीरेणसंयुतं पिवेद्दिमातिमांश्चैवकासे
श्वासादिमुच्यते सप्तभिर्दिवसैर्यस्मनात्रका

यीविचारणं ५ आम्लाचूर्णमादायआक
रेसहस्रसंप्लुतं तिलतैलेनपीतानकुदिश्चला
द्विमुच्यते ६ आम्लायारसंख्यासंहृतेनस
हस्रसंप्लुतं लेपंशिरसिदानअंमासिनीलांज
नोपमं केशाभवंतिदीर्घाश्चसततंहृष्टकुंचि
ताः ७ आम्लाचूर्णमादायमाक्षिकृतसमन्वि
नं प्रातिपानेचभुंजीतकासश्वासाद्विमुच्यते
८ आम्लाकर्षमात्रंचदापयेद्विचक्षणः
वक्ष्याम्लाद्विमुच्येतरोगात्तिंप्रहिमानवः
इत्याम्लीकल्पः ॥ अथब्राह्मीकल्पः ओंवी
रे२ वीरवतितेजोवतिश्रुक्यारिणीयेस्वाहा
अस्याधारिण्यःकल्पंव्याख्यास्यामः ब्राह्मीजा
तिरसंकर्षपकंक्षीरकरेणसहभगवानवलो
कितेश्वरस्याग्रतः एकविंशतिवारवंनंसंज
पवेत् जीर्णेक्षीरभोजनकार्यसमाह्नेन
मेधावीभवति अष्टादशकुष्ठेभ्योविनिर्मुक्तो
भवति गरुडविद्याधरतुल्यकंदोजीवेन्नरोव
र्षसहस्रकम् इतिब्राह्मीकल्पः॥ पुनरन्यंप्र
वक्ष्यामिज्वरीसारविनाशनं शतपुष्पासमूलं
तचित्रकेनसमान्वितम् गर्भेनमस्तुनापीला

क॰ १९

16

सयोगश्चेन्नसंशयः किंचिच्छ्रुतमथास्य प्रयोग
विधिः ॥ अथ लशुनाकल्पः शीतवातहिम
दग्धतनूनांस्तब्धलग्नकुटिलव्यथितानां भेष
जस्य पवनोपहतानां वक्ष्यते विधिरतो लशुनस्य
शीलयेल्लशुनंशेतेवसंतेपिकफोल्बणः व
नोदयेपिवातार्तःसदावाग्रीष्मलीलया तत्क
र्मसिद्धोक्रमशोप्यपतीररसार्पिवेत् कफपि
त्तानिलाशंकी यथास्नेहेषुविमापितान् मांसा
दमांसेर्यक्षाणांत्वर्शांसिकुजैंटंत्वचा हंतिम
ध्रेहशामेहकासश्वासविलम्बिकाः अत्रस्वरू
पविस्तारमस्वत्रूपमुपलभ्यच यथायथंप्रयो
गस्यकार्यमलहकरामाति कूष्मांडवटिकाद्वि
गुलवलाईकसंयुताः घृतेनभर्जिताश्चैषाः
कासश्वासज्वरापहाः वातपित्तहराहृद्याः
शिरोरुक्छर्दवाशनाः मांसेनसंयुतावल्याः
गुरवःपुष्टिवर्धनाः रक्तपित्तविनिर्मुक्ताः स
मलावरणाहृते मुद्गेनिवायतेवाते नहृद्यं
लशुनाभ्यरं आमामशुनान्नेस्यविकारमस्य या
ना यवायसभाख्यचिंता सम्यंदिवानागर
णंनिशास्वनेष्टिंव्यवायंयदिनात्रनेच्छेत्

पांडूदरोगः स्तनशोकत्तलापामात्ययच्छर्दि
विश्वजेषु पैत्ते विकारेरविगदेति सोरसामे शरी
रेचसवर्जनीयः शीलिनाखेशरेतिष्ठरापंवाक्ष
शरीरबलंसममेव वाङ्मतिस्मृतशसाप्रसत
नंसीक्ष्वस्यचवीजविशुद्धिं श्रमनकणस
सत्यंयद्रसेनरसोनंविधियुत

जनयतिशतजीवीस्त्रीस
ह्रायोजरानां कनकरुचिरवर्णोनीरुजस्तुष्ट
पुष्टः इतिलशुनाकल्पः॥ लशुनानंतरंवायोः
पलांडुःपरमौषधम् स्निग्धांगवैरोरवर्णोतिमा
नांवश्केदीमेर्धमेधष्टिःयशस्त्वम् संप्रपद्यंतेतेश
णावेगमुक्तेर्यस्याभ्यासाङ्गारिदीर्घस्वेच श्र
पहारेशालितेशालितेदीर्घरात्रं वल्यंचवृक्षस्तर्प
णंस्थैर्यकारी तेस्त्रैर्यागैर्योजितोयंपलांडुस्तो
स्तानोगान्दोह्रिनाशुच्छिनंति लभतेबलवर्णो
जोवीर्यस्वरसौमनस्यतेजांसि सौणशक्रकुष्ठ
रोपिचरसोनवतद्रसंपिबेत् इतिपलांडुकल्पः॥
अथगुग्गुलुकल्पः गुग्गुलुश्चीलितोहंतिसर्वा
न्वातकफामयान् लघीयशोपितद्भक्षवि
सेनजलेनवा समस्तयान्यान्नमद्येर्वाक्वचाचेः

क॰ १७

17

सलिलेनवा वरुणादेस्तवादिर्यकंतकर्णशिरो
रुजि स्वरभेदोरस्यासवन्धातगुल्मविद्रधौ वा
तपित्तास्रारोगघ्नो बृंहणोर्थिनिचेष्यते क्वाथेवा
वाजिगंधायाजीवनीयघनस्यवा चव्यकृष्णवि
डंगानांयवान्यानागरस्यवा प्रसारण्याश्रतोये
नगुग्गुलकफवातजित् इतिगुग्गुलकल्पः ॥
अथवचाकल्पः मासंवचामप्युपसेवमानःक्षी
रेणतैलेनघृतेनवापि भवंतिरक्षोभिरदृश्यरू
पामेधाविनोनिर्मलमृष्टवाक्याः दीपनीपाचनी
लघ्वीशकृन्मूत्रविशोधनी पित्तश्लेष्मकृमिघ्नहरी
मेधासंजननीवचा वचाचूर्णपलंलिप्ताद्राक्षी
फलस्यभावितम् क्षीरशुक्तात्यहेचाश्मन्मेपार्थी
घृतमिश्रितम् इतिवचाकल्पः ॥ रसोनंहिंगु
मरीचलवणार्द्रकसंयुतम् रुच्यंसंदीपनंव
न्हेः बलशुक्रविवर्धनम् सर्वामयघ्नंकर्णं
शूलापस्मारनाशनम् पंचसारमितिप्रोक्तंदेव
तानांचवल्लभम् १ रसोनंतैलभृष्टंचमरिचार्द्र
करामठम् षड्माषानिसंयोज्यमंत्रपूतंस्त
कारयेत् रसायनमितिप्रोक्तंदेवतानांचवल्ल
भम् हृष्यंचालक्ष्मापुष्ट्यंबलपुष्टिविवर्धनम्

लीणोहियल्कितमेध्यंगुरुरुच्यकरंपरम् निरंबा
ः स्निग्धोरुविष्ट्यः स्थिरधातुकारीबल्योथमे
थाकफपुष्टिदश्च माडुर्गुरुःशोणितशुक्रश
लः सपिच्छुलःस्त्रीरपलांडुभक्तः अतोविरक्ता
हरिणीवातास्रकिमलागुरु शालेयंवटिकंती
क्ष्णंसूक्ष्णंरुक्षंशनाशनं पाकेरसेचकटुकं
बहुविण्मूत्रलंगुरु मालोकवटिकातीक्ष्णागुरु
वातकफप्रदम् शालेयबीजमालोक्यकूष्मांड
पलांडुवारिणिकाः पिष्टावटिकाः पृथक्कल्काः
सदलादलसुक्ष्ममाषाभ्यांकुर्याद्वावानामपिचूर्णी
कृत्यायतानिपचेत् विविधामिषपट्टरामठम
रिचार्द्रकयमकसंस्कृताः खादितव्यंजनंवरांत
दग्धंशीतेपथ्यंविशेषेणरुच्यंहृद्यंसर्वानिलरो
गजिद्वह्निमंदप्रदम् वटिकागुणाः ॥ अथअश्व
गंधाकल्पः पीत्वाश्वगन्धांपयसाचमांसंघृतेन
तैलेनसुखोष्णजलेनवाः कृशस्यपुष्टिंवपुषोविद
द्धिर्बलस्यसस्यस्ययथाम्बुवृष्टिः हेमंतेयोश्वगं
धांसमलाचितनिलांशर्कराभागयुक्तांप्रातःप्रा
तःसमश्नन्नपिबतिनरोवारिदुःखेनसेवी
जीर्णमांसोदनाशीसभवतिपुरुषःस्त्रीषुनित्यं

क॰
१८
18

प्रदुष्टः सत्यंनिर्जित्यवातांदत्तपालिताविमो
हीर्ह्वमातुर्मभेदः इत्यमृगंयाकल्पः ॥ अथपारि
दमूलकल्पः ईश्वरउवाच जम्बुद्वीपवरेश्रेष्ठोहि
मवान्नामपर्वतः तत्रनादेवदेवीशोभथोविज
यास्थिता जयाचैवजयंतीचचतुर्थीसिद्धमूलि
का पंचमीतथागोमोक्षाषष्ठीचैवापराजिता
भंगातुसप्तमीज्ञेयामोदकाचाष्टमीमता अम
लानवमीज्ञेयादशमीव्याधिनाशिनी जरापलि
तदोषघ्नीकुष्ठघ्नीसर्पदंशघ्ना पांडुव्याधिविनिहा
रीनारीपिटिकादोषनाशिनी चक्षूरोगहरादे
वीसर्वभूतभयंकरी कामलाज्वरपित्तघ्नीपार्श्व
शूलविनाशिनी सर्वसौभाग्यजननीसर्वलोक
वशंकरी तस्याकल्पंप्रवक्ष्यामिश्रृहीतायावि
धानतः ससौभाग्यमवाप्नोतिखेचरैः सहमो
दते काश्मीकांतुतांकृत्वाघृतशर्करयान्विता
स्वसह्लायः प्रशांतात्माभक्षयेत्स्वेष्टमंत्रिताम्
ह्रींकाराद्योपतेनपश्चान्मधुरद्रव्यसंस्कृताम् क
टुकानिचचाम्लीयादरिष्टफलदानिते येनयेन
प्रकारेणभक्षयेत्तांतुसाधकः तेनतेनप्रका
रेणफलंचपरमेश्वरी चिंतामणिनिभादेवीचिं

नितार्थफलप्रदा पुनरन्यं प्रवक्ष्यामि प्रयोगं

भुवि दुर्लभम् छायाशुष्कां ततां कृत्वा यावत्स

प्त दिनानि च पुष्यनक्षत्रयोगेन चूर्णयेत्सम

माहितः चूर्णार्द्धहीनान्पुनःशोधयेद्गुग्गुं

लिताम् शर्कराक्षौद्रसंमिश्रां घृतेन प्रविभा

वयेत् भक्षयेत्प्रातरुत्थाय वीरवीरां प्रसन्नधीः

क्षीरषाष्टिकदनं पथ्यमाज्यघवाच्छागलंपलं सैं

धवं क्षारद्रव्याणि भक्षयेच्च विधानतः तेन मो

दति योगीन्द्रो यथेच्छं भक्षणे रतः जीवेद्वर्षश

तायं च वलीपलितवर्जितः सूक्ष्मचूर्णीकृतां

कृत्वा त्रिफलाभिर्विपाचयेत् शर्करासहितये

नैव पुष्कराच घृतमिश्रिता वर्षमात्रेण प्रात

श्च भक्षणान्नीरुजो भवेत् रक्ततीसारनिर्मुक्तः

सर्वव्याधिविवर्जितः समाधिसमये वापि भ

क्षयेद्यः समाहितः परम्भावमवाप्नोति विच

रैः सह मोदते दिवसानां त्रयस्यापि पंचान्तीरा

दिसर्ववत् अथैतच्चूर्णमादाय माहिनेव भाव

येत् प्रातःसायं मध्याह्ने कर्षमात्रं विभाव

तः भक्षयेत्सहसा वल्गान्त्यमानः सचूर्णि

ता पथ्याद्दुग्धाशी नित्यं ततःसाध्यमवाप्नु

क॰ १५

19

यात् उन्मत्ताकर्षषड्भागं मातुलं द्विगुणं ततः
मद्यमध्ये प्रदातव्यं यस्य तद्भ्रमणं भवेत् उन्मत्त
स्तिष्ठते नित्यं त्यटमानो यथेच्छया सशर्करान्
स्पदेयादुग्धपानं सशार्करम् पश्चाच्छाल्योदनं
देयं स्वास्थीकरणमुत्तमम् पिप्पलीत्रिवचाचै
वस्त्ववर्णत्नीरिकातथा सथाहीरं मदनकं शृं
गवेरसमन्वितं मद्यमध्ये भोज्यमध्ये दातव्यं
मरणायतत् शत्रूणां सगुणं चूर्णं नास्त्यस्याप्रति
चौषधं ९ मरिचं पिप्पली शुंठी लवणं विडङ्गं
तथा ह्लस्ताग्रदलवणं विजयापलमात्रकं
गुलिकां कारयेद्देवि सर्यादोचप्रदापयेत् मर
णार्थं च शत्रूणां नास्त्यस्याः स्वास्थ्यमौषधम्
विजया चंदनं चैव कुंकुमेन समन्वितम् गुलि
कां कंठदेशे तु मूर्ध्नि वा हौ प्रकल्पयेत् जांचा
तार्थिकं चोरं हंत्येतश्च न संशयः राजानो व
शमायांति गुलिकैकप्रभावतः तस्मादेषाद्
हीतव्या विधिना साधकेन च चिंतामणिनि
भा देवा मोदने परमा गतिः न देयाडुष्टचित्ता
य विपर्ययफलात्रगा दातव्या साधकेंद्राय
तथाचाररताय च यथोक्तफलदा देवी यथे

द्धान्तविधायिनी इत्येतत्कथितं सर्वयोगि
जं च महोत्तमम् पालनादस्य गजस्य त्रैलोक्यं
च जितं भवेत् येन त्रैलोक्यविजयाईश्वरेण प्र
काशिता इति सिद्धमूलिकाकल्पः ॥ अथ सन
न्दाकल्पः सनंदाला सगंधा च ब्रह्मसोमा सव
र्चला अंजनेनसमस्ताने नीपीलपर्णी स्थिता हि
ता हिरण्यगर्भमूला च शाद्वैः पर्यायवाचकैः
वेतसाकृतिभिः पत्रैः पुष्पैर्बहुभिरावृता: तद्
लेयकमूलेन पुष्पेण च फलेन च शतधा प्रस्
ताभूमौ प्रवालैस्त्वाच्छिन्नैः शुभैः रसैः कटुक
मानष्ठैः कदलीकश्चात्र गंधिका समूलपत्रपु
ष्पा सिद्धकायस्य साधनी रसमानेन साध्र
णं सम्यक्कारणेन हिता सौवरकेन स सिद्धः
पीता हंति कृमीनपि अर्शांसि नाशयत्येषा
हंति हृत्तं निधानि च अंतर्धूमेन सा दग्धा तै
लपिष्टा प्रलेपनी दद्रुविचर्चिकापामासिद्धा
निपिटकाश्चैव दुष्टव्रणानि अर्शांसि नाशये
न्मंडलानि च छायाशुष्कस्य चूर्णस्य ब्रह्मसो
मा पलाचसा पुराणस्य घृतस्यापिहो दसापि
नश्येकच स्निग्धभांडे ततः कृत्वा धान्यमध्येति

क॰
२॰

दापयेत् ततस्तंभेषजं जातं दशाहादुद्धरेत्पु
नः पलंपलं दिने भुक्त्वा जीर्णे भुञ्जीत षाष्टिकं
पयसा मिश्रितं चैव निवाते चालयेत्स्थितः अ
स्यां मासोपयुक्तायां इदं भवति लक्षणम् सर्व
वल्कं त्वकं गुंचैव नखैर्दंतैश्च वार्यते पद्मगर्भनि
भः श्रीमांस्तन्दंपश्चैव मानवः रमणीयः सु
ष्टवाक्यो जितारिर्लोकपूजितः सहस्रन्तुकं च
हत्वाति स्त्रीषु चात्यन्तं व्रजेत् भेषध्यास्य
पयुक्तायां जीवेद्वर्षशतत्रयं इति नीलीकल्पः
अथ भंगिराजकल्पः ईश्वरः यस्मिन्काले मया
देवि क्षीरोदमथनं कृतम् कालकूटं विषं जा
तं दुर्जयं त्रिदशैरपि एतं चैकं दमध्येन विषं
घोरं सुदारुणम् तस्मिन्काले मया दृष्टा औषधी
चमत्कृत्यमा नामानि तस्य वक्ष्यामि ते कचित्ता
वधानतः नीला चैव महानीला विष्णुक्रांता ज
याश्रया श्वेतपुष्पनिभाकारा विजया सर्वमं
गला नामान्यस्य चाख्यातानि लोके भृंगिराज
स्तथा अजिता नीलवर्णा च तथा चैवापराजि
ता नामानि कथितानीह विज्ञातानि वदाम्य
हं औषधी च समाख्याता सर्वकामार्थसाधकः

आदौसौभाग्यजननीवलीपलितनाशनी
व्याधीनांनाशनकरीवरदाचमहौषधी उत्प
त्तिश्चमहाख्यातावमृताश्चसमुद्भवा कुसु
मुष्पाश्वेतवर्णामध्यकूलारसावहा ईदृशंव
रौद्रूपंतत्कथितंतवसुव्रते जलस्थानेषुसर्वे
षुजायतीचमहौषधी खादिरेणतुकीलेन
वारुण्यांदिशिमाश्रिता पूजयित्वाततोदेवी
मंत्रंतस्येवकीर्तयेत् ग्रहणंचयथवस्यामिय
थाकृत्वातिसाधकः पुष्येनक्षत्रसमयेसमु
हूर्तस्वशोभने शुक्लवासाजितक्रोधोदेवता
तिथिपूजकः अहोरात्रोषितोभूत्वाउद्धरेद्ब्रमहौ
षधीम् कुमारीकर्तितसूत्रेणग्रथ्यनीयामहौष
धी श्वेतपुष्पामहाराजगाश्वेतचंदनगंधिनी
शिरसाधारयेद्देविरक्तार्घंचपदेपदे अत्रैवधू
पमंत्रइति कुसरंचबलिंकृत्वाविकरेत्तिलतं
डुलान् महाबलंवेधनंचमंत्रस्यसमुदाहृतं
ॐनमोपन्नेमालिपन्नेममतेजोन्यनघाभवेत्
ममकार्येकृतेपश्चात्स्वर्गगामिष्यसिस्वाहा ब
लिनिवेदनमंत्रइति संस्कृत्याखादिरेकीलेउद्
रेद्दिव्यामहौषधीम् येनराजाबलिर्बद्धस्त्रि

क॰
२८

सोमोमहाबलः तिष्ठतिश्चलिमचलिस्वाहा
वन्यायिनामहादेवीचोड्डोच्चविचक्षणः येनत्वां
त्वनतेब्रह्मायेनेंद्रश्चयमस्तथा तेनाहंत्वनायि
ष्यामिपंचशाखेनपाणिना स्वाहा इतिखनन
मंत्रः उद्धृत्यापिचसंगृह्यक्षालयेत्क्षीरवारिणा
समूलमत्रसंयुक्तंरोचनाकुंकुमैःसह आत्म
शोणितसंयुक्तंसर्वततोवशंकरं स्त्रीणांशिरसि
दातव्यंकुसुमाणांचपादयोः सदासोदासतांया
तियावज्जीवंनसंशयः शफानीनाकर्षणेसह
मात्रेणमर्दितम् अश्वलालासमायुक्तंलेपये
द्भगलिंगयोः रतिःप्रीतिकरस्त्रीणांमहासोभा
ग्यदायकं महानीलाचतगरंकुंकुमंचमनःशि
ला पभिश्चतर्भिःसमायुक्तांतिलकेनचद्वादश
रणेराजकुलेद्यूतेसर्वकर्मार्थसाधनी सर्वत्रवि
जयंचस्याच्छस्त्रपातेजयंभवेत् महानीला॰॰
॰॰ चद्वेहरिद्वेममोत्पलम् उड्डीनपत्रोद्वौराज
दंतीशावलस्यमालोध्रमरस्यपदं रक्तचंदन
मिश्रचूर्णमरणाविषवश्यतांआनयेत् महा
नीलाशिखायांबद्धाप्रविशेद्राजवेश्मनि स
त्यश्चसर्वलोकेषुद्वितीयइवचंद्रमाः महानी

लाक्षतंचूर्णंदक्षिणेकर्णेशरके गृहीत्वाम
थ्यतामेतिशत्रवःसर्वंनृपाश्चतः महानीलां
श्रुत्वेतिमा ॥ याचापिपीडयेत् व्यवहारे
तयाच्छन्नेनित्यंतस्यजयोभवेत् अप्सराकि
न्नरायक्षाराक्षसःदैत्यपन्नगाः देवता ॥
वज्रादिभ्यश्चप्रमुच्यते महानीलाप्रभावेन
यत्रतिष्ठेन्महौषधी पराक्रमंविसृतल्पंसर्व
कामप्रदायिनी अथान्यंसंप्रवक्ष्यामिदिव्येषु
करणंतथा सुभानांसर्वदुष्टानांरिपूणांवशाव
र्तिनाम् महानीलाचगोमांसंशंखचूर्णसमन्वि
तम् सुनोरक्तसमायुक्तं ॥
चतुर्दशपञ्चकस्यपक्षेदक्षिणाभिमुखोस्थितः
... कुरास्नंततोनयेत् ततः
स्वन्दरिपातिनात्रकार्याविचारणा विभीत
कंमहानीलाकाकपक्षसमन्विता सपिधाने
चैककाशीनीलातैलेनभावयेत् विद्विषःस
मरात्रेणसमहोच्चाटनंस्मृतं अनेनैवाहुतिंद
त्वाप्राणापानस्यचैवाहि पञ्चाभिश्चाहुतिभिः
स्तम्भंकुरुतेचत्रिःसप्तकम् अथान्यंसंप्रवक्ष्या
मिवलीपलितनाशनम् निग्रहंचैवव्यापीनां

क॰ २२

वधुस्तंभनमेवच पयोम्बुनागराश्चस्तंपिबतेच
द्दिसप्तकम् एकीकृत्यघृतेगुंजंसप्तरात्रंचम
र्दयेत् पाचनंचततःकृत्वापश्चादेवाभिरंजनम्
शुक्लाहारोविहारश्चवारिमध्येस्थितोभवेत्
पुंसःशावलकादेवऔषधींतत्रयोजयेत् म
हानीलरसंग्राह्यंसमकर्षंचापलंभवेत् नस्येन
चाशिरोरोगान्पलितांश्चविनाशयेत् चक्षुरो
गकर्णशूलंनस्येनचैवनश्यति पानेनत्वपलं
प्रोक्तंश्लेष्मवातविहितोगुणान् कासंश्वासंतथा
हिक्काग्रहदोषंशूलमेवच गुल्ममर्शांसिकंडू
श्चकामलांश्चविचर्चिकां दातव्यानामिश्चले
चरोगाश्चोपहतास्तये हरतेव्याधयःसर्वाःपी
तमात्रामहौषधी ॰॰ यावत्तीरेण
सहभक्षयेत् वलीपलितनिर्मुक्तोजीवेदर्ष
शतत्रयं महानीलाचत्रिफलालोहचूर्णसम
न्विताः कृत्वातिलैश्चसंयुक्तांगुडभागंततःलि
पेत् आतपेशोषयित्वाचदरीद्राणांमहौषधी
योवैभक्षयतेदेविजरामृत्युविनाशिनी म
हानीलासहमस्यंतघाधात्रीफलाद्दसम्
लोहचूर्णपलान्पंचतैलप्रस्थंचपाचयेत् प

केह्रंगिरसेयोज्यंवलीपलितनाशने मधुनास
र्पिषाचैववचाभागेनसंयुतं प्रयोगंपरमंप्रोक्तं
लेपेचेतिकरंभवेत् महानीलाचेंद्रयवाकुष्ठं
सर्जरसंतथा द्वेहरिद्रेतथाप्रोक्तेसर्पिषाचसम
न्विते सर्व॰॰ए‍्डप्रशमनंह्यत्तमिंद्राशनिर्यथा
महानीलासत्रिफलासर्वलोहसमन्विता १रु
षभागेतैलंचसिंचनेस॰॰ताहरे हरिताःकुंचि
ताःकेशाःपानेनास्यतथैवच इतिभृंगिराजक
ल्पः॥ अथैकवीराकल्पः एकवीरार्धपलमा
त्रेणपूर्वंशोधितंकृत्वा एकाह्निकद्व्याह्निकत्र्या
ह्निकचातुर्थिकज्वरंनाशयति मातुलानीमब
लसहितांपद्मकेसरसंयुतांगजमदेनपेष्यगुलि
कांकारयेद्बुधः वक्त्रेणधार्यमाणायाःसर्वोज
नःप्रियोभवति एकवीरांब्रह्मदंडीतिलेनस
हपेषयेत् एतेनोद्वर्तयेन्नारीनान्यंपुरुषमि
च्छति ब्रह्मदंडीदध्यशनंपिप्पल्योमरिचानि
च एकवीरासमायुक्तंमातुलेनसमन्वितम्
एषधूपवरःश्रेष्ठोचित्तमोहनम् मातुलानीब्र
ह्मदंडीसकल्कंपरिकीर्तितम् चूर्णंरोपयतेस
र्वदुष्टनाडीव्रणेषुच भगन्दरेषुसर्वेषुलूताविं

क॰
२३

स्फोटकादिषु लोहलिंगेषु सर्वेषु लेपान्नाशाय
तेलगात् स्थावरंजंगमं चैव शंकाख्यं कृत्रिमं वि
षं पीताक्षीरेन तक्रेण स्वस्थो भवति मानवः स
र्वकर्माणि कुरुते यत्र यत्रोपयुज्यते किमत्र मंत्रा
दिगणः प्रयोगे विधानतः ॐ नमस्तेमृतसंभू
ते बलवीर्यविवर्धिनि बलमायुश्च मे देह्नि पय
नामेव्यपोहय राक्षसानां पिशाचानां स्तम्भका
श महासुरान् तेषां प्रसादनि च दंष्ट्रिये ये चान्ये प
रिपंथिनः ॐ उन्मत्ते मानि पत्ते तेजस्याशोद्भवेति
ष्टकल्याणि मम कार्यं करिष्यामि ॐ भूः ॐ भुवः
ॐ स्वः ॐ भूर्भुवः स्वः स्वाहा बन्धसमयनिशमो
स्वाहा इत्येकवीराकल्पः ॥ अथ द्वितीयैकवी
राकल्पः जालभंगामातुलानीद्रेकपर्णीजलो
द्भवा छायाशुष्कां ततो कृत्वा सर्वकर्मसु योज
येत् एकवीराब्रह्मदंडीपिप्पलीमरिचानि च
एतदुद्वर्तनं श्रेष्ठं नारीणां चित्तमोहनम् मातु
लानीब्रह्मदंडीकटुमलं परिकल्पयेत् चूर्णं च
रोपणं सर्वदुष्टनाडीव्रणेषु च गर्दभीषु च लू
तामर्कीटविस्फोटकादिषु लोहलिंगेषु सर्वे
षु लेपने शमयिष्यति स्थावरंजंगमं चैव शंका

थेहत्रिमं विषं पीत्वा क्षीरेणातक्रेणवा त्वो भवति निर्विषः इति द्वितीयमेकवीराकल्पः ॥
अथ काचमाचीकल्पः पलमेकं काचमाचीतो यप्रस्थे विनिक्षिपेत् क्वाथाष्टभागशेषं च पीत्वा नेत्रविकारजित् नागरया समायुक्तमती सारविनाशनम् प्रस्थं तक्षीरक्वाथितमष्टभागं तयाहरयेत् शार्करामधुसंयुक्तं रक्तपित्तविनाशनम् काचमाचीपलं दत्त्वा त्रिफलायाः पलत्रयम् मधुसर्पिः प्रतिपलं सोमराजीपलं क्षिपेत् कर्षं तं भक्षयेन्नित्यं कुष्ठनाशं दशाहरेत् त्रिफलाकाचमाचीचपलमेकं तन्मिश्रितम् पानीयप्रस्थक्वाथितं त्वष्टभागं समुद्धरेत् सर्वरोगविनाशाय द्ध्येगमामरोगाजित् वातश्लेष्मवज्रो द्धोगं कं दरोगं विनाशयेत् पांडुरोगं तथार्शांसि तथा चैव भगंदरम् आमवातं तथा गुल्मं कासं श्वासं च नाशयेत् गोक्षीररससंयुक्तं रक्तपित्तं हरेत्तत्क्षणात् सैन्धवेन तु संयुक्ता वातश्लेष्मं निवारयेत् मधुसर्पिः समायुक्ता रेवविषघ्नं गरदोषभाक् सुंठीगुडसमायुक्तानलरोगविकारजित् सैंधवं नागरं हिंगु काचमाचीरसान्वितम्

क· सर्ववातविकारघ्नं सर्वामयविनाशनम् सार्पिरि
२४ त्ससमायुक्तास्तगादिस्त्वविकारजित् काचमाची
रसंहस्तसथाक्षीरसमान्वितम् अर्शांसिभगंदरं हंति
लोहलिंगंविनाशयेत् इतिकाचमाचीकल्पः॥
24 अथवचाकल्पः ॐ क्लीं वरे २ महावीरवराहमाद्रि
षदंष्ट्रोत्कटेस्वाहा ॥ अनेनैववत्समंत्रेणसर्वक
र्माणिसाधयेत् त्वं प्रभातेग्राहयेत्प्राज्ञोमूल
मंत्रेणपारयेत् सर्वरोगहरवाटीचसमवाराभि
मंत्रिताम् कृत्वावचामस्यांविनिक्षिपेत् त्वं
कासश्वासस्समायितैवचाचघृतभर्जिता त्रिका
लंभक्षयेन्नत्रश्वासकासविनाशनम् कासश्वा
ससमायुक्तोवचांयोभक्षयेद्बुधः शास्त्रेंद्रसम
मत्वंमुख्यंतस्यैवजायते हस्तिकर्णीचगोकर्णी
सस्वकर्णीतथैवच वचांशणवतांचांद्र् कृत्वा
तप्रयत्नतः स्निग्धभांडेचसंस्थाप्ययावद्भूमरवी
जकं घृतत्रिभागसंयुक्तांसार्धामक्षगुणांभवेत्
काचमाचीरसंतत्रचतुर्गुणंविनिक्षिपेत् भोज
येत्काल्यमुत्थायसर्वव्याधिविनाशनम् घृतंशु
द्धंतथाभोक्तंभोजनंतत्रकारयेत् वलीपलित
नाशार्थंप्रयोगश्चतथापरः सिद्धार्थकवचाकु

हेंद्रयिशीर्षंतथैवच पिप्पल्योमरिचंचैवसम
भागानिपेषयेत् वचयाचसमायुक्तंनारीप्र
दयहारिणम् मातुलानीवचाखंडंमातुलेन
ययोजयेत् पक्षमपवरःश्रेष्ठोनारीणांचिन
मोहनः त्वं कात्यायनाकायशोजेतर्भतयेच्च
दिनेदिने इहलोकेमहासिद्धिःपरत्रचतथैव
च यस्यागृतस्तिष्टेत्सावचाचपरमेश्वरी न
तत्रयत्नास्तिष्ठंतिनपिशाचानराक्षसाः नभूता
नब्रह्मास्त्रसर्वेतेचसमागतः इतिवचाकल्पः
अथान्यवचाकल्पः सोमस्यग्रहणेग्राह्यावचा
नाममहौषधी सर्वरोगहरीदेवीप्रज्ञामायावि
नाशिनी दीपनीपाचनीलघ्वीशकृन्मूत्रविशो
धनी वातश्लेष्मकृमिहरीमेधामंजननीवचा
स्वल्पचूर्णंतुतांकृत्वावचानाममहौषधीम्
मधुनासहसंलेप्यासर्पिषाचगुडेनच पयसा
वाचसंमिश्रादाडिमस्यरसेनवा पलार्धमपि
भुंजीतजीर्णेतेषाष्टिकोदनम् प्लीहरोगंश्वा
सकासंमूत्रकृच्छ्रंभगंदरम् कुष्ठंतसमरात्रे
णहंतिरोगानसंशयः अजीर्णनाशनीपथ्या
वह्निदीप्तिकरीशुभा छर्दिकासहरानित्यंस्रं

क॰
२५

25

दीमिश्रावचाशुभा वचाचाप्युपयुंजीतमुंदीमि
श्राविशेषतः कल्केनसंधवेनापिग्रालिकांकार
येद्बुधः छागलीरोदनंपश्चाद्भुंजीतासितयासह
सप्तरात्रप्रयोगेनश्लेष्मरोगाद्विमुच्यते बाल
स्यचवचादेयासक्षौद्रासघृतातथा भृंगवीरे
णसंयुक्तासर्वामयविनाशिनी राक्षसास्तेनहिं
संतिनपिशाचाःकथंचन कल्केचापिपलेवापि
वचांसंधारयेद्बुधः दाहोपसर्गदुर्भिक्षराष्ट्रेत
न्नाशयेद्वचा क्रांतिशूलेचमंदाग्नेश्चजीर्णेचापि
नित्यशः मुखेस्रुद्भेचदन्तकंठेसर्वाश्लेष्मव्या
धिषु मातिकेनसमायुक्तासयोव्याधिंशतंह
रेत् वचाघृतविपक्वाचबालस्यबहुस्वरात्विषु
दातव्यासभवेन्नित्यंमेधावीचिरजीविनः जात
मात्रस्यबालस्यलेह्यमेतच्चदापयेत् वचाक्षौ
द्रेणसंयुक्ताब्राह्मीरससमाहृतः कासश्वास
ज्वरघ्नीचाक्रिमिपलितनाशनम् धार्यमाणा
वचाहंतिसर्वान्दोषान्नसंशयः बलामोटाव
चाकुष्ठंतथाप्रतिविषासमम् अंजनंपयसापि
ष्टंगोक्षीरेणचपेषयेत् तिमिरंपटलंकाचंस
र्वमेतेनशाम्यति कुष्ठंवचाचहस्तिनारेली

रेणापेषयेत् सद्यः शूलहरा चैषा चोक्ता सर्वा
स्त्रिरोगिणाम् हिंगुभागं भवेदेकं वचया द्विगुणं
तथा विडंगं त्रिगुणं दद्याच्छुंगवेरं चतुर्गुणम्
यवानी पंचगुणिता षड्गुणा च... या तथा
चित्रकं सप्तगुणितं सूक्ष्मचूर्णं तु कारयेत् एत
स्मात्तां कृतं सर्वदा पाययेत विचक्षणः मद्येनेवा
थ चाम्येन दद्यात्कुम्भोदकेन वा गुल्मघ्नं दीपनी
यं च अर्शोघ्नं शूलनाशनम् कासश्वासहरं चैव
चूर्णमानाहभेषजम् वचयापलमेकं च यवानी
यफलषोडशम् चतुष्पलेन तोयार्द्रं पीनाच
च्छूलनाशनं वचा हिंगुहरीतक्यासैन्धवं चाम्ल
वेतसम् यवक्षारं यवानी च पिबेद्रसेन वारिणा
एतेन गुल्मिनिचयं सशूलं नश्यते भृशम् वचा
वातक संकुष्ठं शर्करा गुडमिश्रितम् गुलिकां
कारयेदेतां विषमज्वरनाशिनीम् इति श्रीवचा
कल्पः ॥ अथ सर्मंतपुष्पीमध्यात् किंचित्
पीतैः पुष्पैश्च सर्वैस्तु ख्याता सर्मंततो भवेत् स
मंतपुष्पीनाम्ना च याख्याता पृथिवीतले समंत
पुष्पीमादाय समूलपत्रसंयुताम् पुष्पैः सम
न्वितां चैव सूक्ष्मचूर्णं तु कारयेत यदि भवति

क॰
२९

70

चक्षुरुत्पलश्चैवमभवेयदि नस्यनस्यप्रदानकं
माक्षिकेनतुसंयुतम् नस्यमात्रेततोदक्षेनिवा
तेवेश्मनिस्थितः स्थिराज्जुलान्विमुच्येतचक्षुः
सावाक्षयेवच माक्षिर्यंभोजनंचैवदापये
द्धृतसंयुतम् एतेनविधिनाचैवचक्षुरोगाद्वि
मुच्यते समस्तउष्णीचूर्णेनकृत्वास्यक्षणमे
वच माक्षिकेनसमायुक्तमस्याचूर्णंसमायुतं
लेहित्वाप्रातरुत्थायकर्षमात्रप्रमाणतः ईद्द
शेश्चविकारश्चमुच्यतेनात्रसंशयः पिबेद्दैच्छा
गलंक्षीरंक्वाथित्वाचसशर्करम् इतिसमंतउ
ष्णीकल्पः ॥ अथसर्पाक्षीकल्पविंचित् शुक्र
उवाच भगवन्देवदेवेशकालमांगदाहक क
थंसर्पाक्ष्याःकल्पंवैवयामेनप्रकाशितः ईश्व
रउवाच शृणुभार्गववक्ष्यामिकल्पंपरमदुर्ल
भं क्षीरोधौमथितःसर्वंममृतार्थंसुरासुरैः
तन्मध्यादोषधीजातासर्पाक्षीनामविश्रुता र
सार्थंविहितादेवैर्मर्त्यानांहितकाम्यया इर्ल
भामरुतंमूलेनस्वरुधिरवर्णकम् भ्रजगंधा
लपत्रस्यपत्रेनसदृशंभवेत् शाखोविद्रुम
वर्णाभारसोगोक्षीरसन्निभः सर्पेक्षणस्यस

दर्शनं तस्याः पुष्पं प्रजायते तदा ना स्त्रा तु सर्प
ही सत्कृतासा महौषधी अभिमन्त्रितेन विधानेन
व्यज्यते साधकादिभिः चातुर्थिक प्रशमनी
वेकाहिकत्रिकनाशिनी तनलयापहारिणी वि
षग्रहनिकृंतनी वंध्यानां पुत्रजननी कुष्टघ्नी
रक्तपित्तहा चाकृष्टपलितघ्नी चरक्तपित्तवि
नाशनी सौभाग्यवर्धनी शुक्रकालूताविस्फोट
नाशनी तथा पिबेत् तोयपायेन ग्राहयेत् दामिते
सूर्योदयस्य काले तु तिष्ये चैव भार्गव सप्तल
पत्रशाखा वा ग्राह्ये तत्सर्पलोचनाम् अंतर्धूमे
न दग्ध्वा तु छागमूत्रेण पेषयेत् नेत्राणां अंजने
दत्ता चातुर्थिकविनाशनी सोमस्य ग्रहणे ग्रा
ह्या सर्पाक्षी भृगुनंदन रक्तसूत्रेण बद्धा तु वा
मकर्णे निबंधयेत् ज्वरमेकाहिकं हंति द्विती
यकाविधिं स्मरण तथैव दक्षिणे कर्णे हि सप्त
त्रेण बंधयेत् कर्णे हृदये निबद्धा च तार्तीयकं ज्वरं
हरेत् पलमेकं तु सर्पाक्ष्याः पयसा जेय च भार्गव
प्रस्थार्धेन विनिक्षिप्य क्वाथयेद् दशमादितः अ
पराह्णे पिबेत् त्र्याहितं सप्तादिकं हरेत् बिडाल
पदसर्पाक्षी नरमूत्रेण पेषयेत् पीत्वा सर्ववि

का° २१ षं हंति स्थावरं जंगमं तथा कृत्रिमं चैव शंका
ख्यं निर्विषं कुरुते क्षणात् बाह्ये लेपेन तेनैव
लूताविस्फोटनाशनी गोनसीमेहनादौ चावि
सृक्रांता कटम्बरा समूलपत्रशाखां चौ सर्पा
क्षीं च समाहिपेत् एतत्कल्कं कृतं चूर्णं क्षौद्रेणो
णच पेषयेत् अपं सर्वग्रहहरं शाकिनीभूतना
दिषु एतत्तस्मादपस्मारं नाशयेन्नात्र संशयः
मूलं कुंकुमपुष्पस्य सर्पाक्षीं भृंगनंदन सम्मा
मेव सर्पाक्षीं वामहस्तेन पेषयेत् अस्याष्टभा
गं गोक्षीरेण पक्केन निवेशयेत् सर्वाङ्केन ऋत
स्नाता स्त्री गर्भं प्रपद्यते समूलपत्रशाखां
सर्पाक्षीं कर्णिकेन तु प्रपेष्य गुलिकां कृत्वा त्वा
याष्टषष्ठांशं पेषयेत् एकाहमपराह्णे तु भक्षा
कुष्ठं विनाशयेत् मासत्रितयकेनैव सत्यं सत्यं
तु भार्गव मासेन हि द्विकटिभेद दद्रुश्चैव वा विचर्चि
का तथा चर्मदलं चैव शिशिडिम्बापि समं ततः
सुपिष्टं सर्पनयनी मातृकेन तु भावयेत् अत
मात्रं तु लिप्सा देहे रक्तपित्तादि मुच्यते सर्पाक्षिके
न क्षीरेण महाशंखं विनिघर्षयेत् दद्यान्नेत्रयो
र्यसे चक्षुःकाकाचार्बुदादिकम् पुष्पादितिमिर

स्त्रावंपटलंचनसंशयः कर्षैकंसाभ्रकस्यैव
सर्पाक्ष्याश्चरसेनैव मर्दयित्वालिहेत्ततोजी
र्णेतेषाष्टिकोदनम् गवांक्षीरेणसंयुक्तंशाक
सैंधववर्जितम् कर्षेणैकेनभुक्तेननाशयेत्प
लितावलीम् अदृश्यःसर्वभूतानांजीवेद्वर्षश
तत्रयम् छायाशुष्कांतुसर्पाक्षीमर्द्धमेकंप्रपे
षयेत् प्रस्थाष्टभागंनिक्षिप्तंतंडुलोदकमध्य
तः दिनत्रयंपिबेद्यावत्तमन्यतेसाहिसंवत्सरात्
चूतपुष्पांतुसर्पाक्षींनित्यंवेश्मनिधूपयेत् अ
लक्ष्मीर्नश्यतेतत्रनित्यंलक्ष्मीप्रवर्धते ॐअम
तेअक्षीक्षक्षीक्षसशावशितेस्वाहा अयंशक्तः
शतजप्तोभुजंगानयंतेस्त्रीणांचनरापिशतेज
पेक्षानामूलंकंठेबद्धाशीतंनाशयति इदंरह
स्यंपरमंसमाख्यातंमयातव गोपनीयंप्रयत्ने
नचौरेभ्योद्रविणंयथा शुक्रउवाच अद्यमेस
फलंजन्मभवद्वक्त्राच्छ्रुतोमया सर्पाक्ष्याश्चैव
कल्पोयंसर्वकार्यार्थसाधकः इतिसर्पाक्षीकल्पः
अथद्वितीयकाचमाचीकल्पः हिमवत्पृष्ठस
म्भूतांपुष्पितांफलवर्जिताम् काचमाचेश्चपो
मासेसमाहृत्याग्निनापचेत् समाहृत्यदश

क॰ बलेपंचतैलपलानिच दत्वान्नभोजयेत्प्राज्ञः
२८ पानेत्वामलकोदकान् मासमेकंतुभुंजानःस
ततंब्रह्मचर्यवत् शृद्धवद्धिबलाढ्याष्टिस्त्रस्यानि
त्वंभाविष्यति वलीपलितनिर्मुक्तोनिर्व्याधिस्त
78 श्चात्मयः तेनासिद्धेनशाकेनभुंजानःषाष्टिको
दनम् दिव्यचक्षुर्नरोजीवेद्बलवांशरदांशतम्
अथवाकाचमाच्यास्तैतलंसिद्धंपिवेन्नरः पिव
ड्राक्षीफलसमंभुंजानःषाष्टिकोदनम् बलवा
न्व्याधिनिर्मुक्तोवलीपलितवर्जितः सम्यक्प्र
योगंकुर्वाणःकाचमाच्यापिवेन्नरः चतुष्पानि
द्रियैःपुष्टोब्रवीत्मिथिलाधिपः यःकाचमा
चीसफलांसपुष्पांविशुद्धदेहस्तिलतैलपक्वान्
खादेन्निकामंदिवसानिसप्तत्रिसप्तकृत्वामल
काम्बुपायी भुवेतनीलोत्पलपत्रभंगिनाशि
रोरुहैरंजनमेचकाकृतिः पुनर्वलीशृङ्गनिभे
नवत्स्याजीवेन्नरोवर्षशतंसनीरुजम् काच
माचीफलरसंसपक्वंमधुनासह ताम्रभांडेनि
धायेतएकविंशद्दिनानित अर्द्धपंपदलंका
चंपलंकंदूसवेदनम् अन्योपिनन्यतांयाति
यदिनोतत्वाददितेपुरा इतिकाचमाचीकल्पः ॥

अथनार्जनीमूलीकोशं बलामूलंसमन्वितंकृत्वा धूपेनसर्वज्वरंनाशयति श्वेतापराजितामूलेंगलेबद्धावद्धुपरांस्वलम्भयति २ त्रिवार्षिककर्णासमूलंवृश्चिकदंशंनाशयति काचमाचीमूलंसैन्धवेनसहपीत्वावायुकार्षपंनाशयति कुशामूलेनतक्रेणसहपीत्वाकण्ठुंनाशयति गोजिह्वामूलंउदकेनसहपीत्वाविस्फोटंनाशयति विस्वक्रान्तामूलंहस्तेबद्धासिंहव्याघ्रभयंनाशयति

